निर्णयार्थं जैमिनिप्रणीते धर्ममीमांसारूपे ग्रन्थभेदे।

**धर्मसेतु** पु० धर्मस्य सेतुरिव धारकत्वात्। धर्मरक्षके "राजा दशरथो नाम धर्मसेतुरिवाचलः" रामा० आर० ६२अ०। एकादशमन्वन्तरे आर्य्यकस्य सुते २हरेरंशभेदे च। तदुपक्रमे "आर्य्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः। वितायां हरेरंशस्त्रिलोकीं धारयिष्यति" भाग० ८।१३।१२

**धर्मस्कन्ध** पु० आर्हतमतसिद्धे धर्मास्तिकायपदार्थे अर्हत्शब्दे दृश्यम्।

**धर्माङ्ग** पुंस्त्री धर्म इव शुद्धमङ्गमस्य। वके निघण्टुः स्त्रियां [ङीष्।

**धर्माचार्य्य** पु० धर्मे आचार्य्यः। १धर्मशिक्षके गुरुभेदे ऋग्वेदिनां तर्पणीये २ऋषिभेदे च "सुमन्तुजैमिनिवैशम्पायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्य्या इत्युपक्रमे ये चान्ये आचार्य्यास्ते सर्वे तृप्यन्त्विति" आश्व० गृ० ३।४।४। धर्माचार्य्याश्च नैमित्तिकादिप्रलयोत्तरं वैदिकधर्माचारयोः शिक्षार्थं वीजीभूता धर्मप्रवर्त्तका ऋषिभेदाः यदाह मिता० प्रा० अध्याये "ननु नैमित्तिकादिप्रतिसञ्चरेऽखिलाध्यापकप्रलयादविदितवेदास्तस्योपरितनाजनाः कथमग्निहोत्रादिकं कर्म करिष्यन्ति। कथन्तरामाकृतकर्माणः स्वर्गमार्गमधिरोक्ष्यन्तीत्यत आह "तत्राष्टाशीतिसाहस्रा मुनयो गृहमेधिनः। पुनरावर्त्तिनो वीजभूता धर्मप्रवर्त्तकाः" याज्ञ०। तत्र पितृयाने अष्टाशीतिसहस्रसंख्या मुनयो गृहस्थाश्रमिणः पुनरावृत्तिधर्माणः सर्गादौ वेदस्योपदेशकतया धर्मतत्त्वप्रादुर्भावे वीजभूताः सन्तोऽग्निहोत्रादिधर्मप्रवर्त्तका अतो न प्रागुदितदोषसमागमः। किञ्च। "सप्तर्षिनागवीथ्यन्तर्देवलोकं समाश्रिताः। तावन्त एव मुनयः सर्वारम्भविवर्जिताः। तपसा ब्रह्मचर्य्येण सङ्गत्यागेन मेधया। तत्र गत्वावतिष्ठन्ते यावदाहूतसंप्लवम्" याज्ञ०। सप्तर्षयः प्रसिद्धा नागवीथ्यैरावतपथः तदन्तराले तावन्त एवाष्टाशीतिसहस्रसंख्या मुनयः सर्वारम्भविवर्जिताः केवलज्ञाननिष्ठास्तपोब्रह्मचर्य्ययुक्तास्तथासङ्गत्यागिनो देवलोकं समाश्रिताः। आहूतसंप्लवमाभूतप्रलयपर्य्यन्तमवतिष्ठन्ते। तत्र च स्थिताः सृष्ट्यादावाध्यात्मिकधर्माणां प्रवर्त्तकाः। कथम्भूतास्ते मुनय इत्यत आह "यतो वेदाः पुराणानि विद्योपनिषदस्तथा। श्लोकाः सूत्राणि भाष्याणि यच्च किञ्चन वाङ्मयम्" याज्ञ०। यतो द्विविधादपि मुनिसमूहाच्चत्वारो वेदाः पुराणाङ्गविद्योपनिषदश्च नित्यभूता एवाध्येतृपरम्परायाताः प्रवृत्तास्तथा श्लोका इतिहासात्मकाः सूत्राणि च शब्दानुशासनमीमांसागोचराणि। भाष्याणि च सूत्रव्याख्यारूपाणि यदन्यदायुर्विद्यादिकं वाङ्मयं तदपि यत् सकाशात्प्रवृत्तं तथाविधास्ते मुनयो धर्मप्रवर्त्तकाः। एवं सति वेदस्यापि नानित्यतादोषप्रसङ्गः"।

**धर्मात्मन्** पु० धर्म आत्मा स्वभावो यस्य। धर्मशीले "स तानुवाच धर्मात्मा महर्षीन् मानवो भृगुः" मनुः।

**धर्माधर्म** पु० द्वि० व० धर्मश्चाधर्मश्च द्व०। १पुण्यपापयोः "धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश" भाषा०। धर्माधर्मौ परीक्षणीयतयाऽत्र स्तः अच्। धर्मजरूपे दिव्यभेदे तद्विधानं वीरमित्रोदये यथा "तत्र पितामहः "अधुना संप्रवक्ष्यामि धर्माधर्मपरीक्षणम्। हन्तॄणां याचमानानां प्रायश्चित्तार्थिनां नृणामिति"। हन्तॄणां साहसाभियोगेषु, याचमानानामित्यर्थाभियोगेषु, प्रायश्चित्तार्थिनां नृणामिति पातकाभियोगेषु एतद्दिव्यं भवतीति सूचितम्। धर्माधर्मदिव्यप्रकारमाह स एव "राजतं कारयेद्धर्ममधर्मं सीसकायसम्। लिखेद्भूर्जे पटे वापि धर्माधर्मौ सितासितौ। अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत्। सितपुष्पस्तु धर्मः स्यादधर्मोऽसितपुष्पधृक्। एवंविधायोपलिप्य पिण्डयोस्तौ निधापयेत्। गोमयेन मृदा वापि पिण्डौ कार्य्यौ समन्ततः। मृद्भाण्डके उपहृते स्थाप्यौ चानुपलक्षितौ। उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ। आवाहयेत्ततो देवान् लोकपालांश्च पूर्ववत्। धर्मावाहनपूर्वन्तु प्रतिज्ञापत्रकं लिखेत्। यदि पापविमुक्तोऽहं धर्मस्त्वायातु मे करे" इति मन्त्रं विशोध्यो ब्रूयात्। अहमिति मन्त्रलिङ्गात्। वृहस्पतिरपि "पत्रद्वये लेखनीयौ धर्माधर्मौ सितासितौ। जीवदानादिकैर्मन्त्रैर्गायत्राद्यैश्च सामभिः। आमन्त्र्य पूजयेद्गन्धैः कुसुमैश्च सितासितैः। अभ्युक्ष्य पञ्चगव्येन मृत्पिण्डान्तरितौ ततः। समौ कृत्वा नवे कुम्भे स्थाप्यौ चानुपलक्षितौ। ततः कुम्भात्पिण्डमेकं प्रगृह्णीतानुयाचितः। धर्मे गृहीते शुद्धः स्यात् सम्पूज्यश्च परीक्षकैरिति" जीवदानादिकैर्मन्त्रैः, मा प्र गाम पथो वयमित्यादि" ऋ० १०।५७।१ सूक्तपठितऋङ्मन्त्रैः अन्यैर्वा आगमोक्तैः प्राणप्रतिष्ठामन्त्रैरित्यर्थः। ते च शारदातिलके उक्ताः"।

**धर्माधर्मविद्** पु० धर्माधर्मौ वेत्ति विद–क्विप् तह०। १मीमांसके स हि विधिनिषेधगम्यौ धर्माधर्मौ तत्त्वतो